॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ६२

ततोऽब्रवीन्महातेजाः सुग्रीवो वानराधिपः ।
अर्थ्यं विजापयंश्चापि हनूमन्तं महाबलम् ॥ १॥

यतो हतः कुम्भकर्णः कुमाराश्च निषूदिताः ।
नेदानीइमुपनिर्हार म् रावंओ दातुमर्हति ॥ २॥

ये ये महाबलाः सन्ति लघवश्च प्लवङ्गमाः ।
लङ्कामभ्युत्पतन्त्वाशु गृह्योल्काः प्लवगर्षभाः ॥ ३॥

ततोऽस्तं गत आदित्ये रौद्रे तस्मिन्निशामुखे ।
लङ्कामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः ॥ ४॥

उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः ।
आरक्षस्था विरूपाक्षाः सहसा विप्रदुद्रुवुः ॥ ५॥

गोपुराट्ट प्रतोलीषु चर्यासु विविधासु च ।
प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनम् ॥ ६॥

तेषां गृहसहस्राणि ददाह हुतभुक्तदा ।
आवासान्राक्षसानां च सर्वेषां गृहमेधिनाम् ॥ ७॥

हेमचित्रतनुत्राणां स्रग्दामाम्बरधारिणाम् ।
सीधुपानचलाक्षाणां मदविह्वलगामिनाम् ॥ ८॥

कान्तालम्बितवस्त्राणां शत्रुसञ्जातमन्युनाम् ।
गदाशूलासि हस्तानां खादतां पिबताम् अपि ॥ ९॥

शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह ।
त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः ॥ १०॥

तेषां गृहसहस्राणि तदा लङ्कानिवासिनाम् ।
अदहत्पावकस्तत्र जज्वाल च पुनः पुनः ॥ ११॥

सारवन्ति महार्हाणि गम्भीरगुणवन्ति च ।
हेमचन्द्रार्धचन्द्राणि चन्द्रशालोन्नतानि च ॥ १२॥

रत्नचित्रगवाक्षाणि साधिष्ठानानि सर्वशः ।
मणिविद्रुमचित्राणि स्पृशन्तीव च भास्करम् ॥ १३॥

क्रौञ्चबर्हिणवीणानां भूषणानां च निस्वनैः ।
नादितान्यचलाभानि वेश्मान्यग्निर्ददाह् सः ॥ १४॥

ज्वलनेन परीतानि तोरणानि चकाशिरे ।
विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे ॥ १५॥

विमानेषु प्रसुप्ताश्च दह्यमाना वराङ्गनाः ।
त्यक्ताभरणसंयोगा ह्राहेत्युच्चैर्विचुक्रुशः ॥ १६॥

तत्र चाग्निपरीतानि निपेतुर्भवनान्यपि ।
वज्रिवज्रहतानीव शिखराणि महागिरेः ॥ १७॥

तानि निर्दह्यमानानि दूरतः प्रचकाशिरे ।
हिमवच्छिखराणीव दीप्तौषधिवनानि च ॥ १८॥

हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि ।
रात्रौ सा दृश्यते लङ्का पुष्पितैरिव किंशुकैः ॥ १९॥

ह्रस्त्यध्यक्षैर्गजैर्मुक्तैर्मुक्तैश् च तुरगैरपि ।
बभूव लङ्का लोकान्ते भ्रान्तग्राह इवार्णवः ॥ २०॥

अश्वं मुक्तं गजो दृष्ट्वा कञ्चिद्गीतोऽपसर्पति ।
भीतो भीतं गजं दृष्ट्वा क्व चिदश्वो निवर्तते ॥ २१॥

सा बभूव मुहूर्तेन हरिभिर्दीपिता पुरी ।
लोकस्यास्य क्षये घोरे प्रदीप्तेव वसुन्धरा ॥ २२॥

नारी जनस्य धूमेन व्याप्तस्योच्चैर्विनेदुषः ।
स्वनो ज्वलनतप्तस्य शुश्रुवे दशयोजनम् ॥ २३॥

प्रदग्धकायानपरान्राक्षसान्निर्गतान्बहिः ।
सहसाभ्युत्पतन्ति स्म हरयोऽथ युयुत्सवः ॥ २४॥

उद्घुष्टं वानराणां च राक्षसानां च निस्वनः ।
दिशो दश समुद्रं च पृथिवीं चान्वनादयत् ॥ २५॥

विशल्यौ तु महात्मानौ तावुभौ रामलक्ष्मणौ ।

असम्भ्रान्तौ जगृहतुस्तावुभौ धनुषी वरे ॥ २६ ॥

ततो विस्फारयाणस्य रामस्य धनुरुत्तमम् ।
बभूव तुमुलः शब्दो राक्षसानां भयावहः ॥ २७ ॥

अशोभत तदा रामो धनुर्विस्फारयन्महत् ।
भगवानिव सङ्क्रुद्धो भवो वेदमयं धनुः ॥ २८ ॥

वानरोह्रुष्टघोषश्च राक्षसानां च निस्वनः ।
ज्याशब्दश्चापि रामस्य त्रयं व्याप दिशो दश ॥ २९ ॥

तस्य कार्मुकमुक्तैश्च शरैस्तत्पुरगोपुरम् ।
कैलासशृङ्गप्रतिमं विकीर्णमपतद्भुवि ॥ ३० ॥

ततो रामशरान्दृष्ट्वा विमानेषु गृहेषु च ।
संनाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥ ३१ ॥

तेषां संनह्यमानानां सिंहनादं च कुर्वताम् ।
शर्वरी राक्षसेन्द्राणां रौद्रीव समपद्यत ॥ ३२ ॥

आदिष्टा वानरेन्द्रास्ते सुग्रीवेण महात्मना ।
आसन्ना द्वारमासाद्य युध्यध्वं प्लवगर्षभाः ॥ ३३ ॥

यश्च वो वितथं कुर्यात्तत्र तत्र व्यवस्थितः ।
स हन्तव्योऽभिसम्प्लुत्य राजशासनदूषकः ॥ ३४ ॥

तेषु वानरमुख्येषु दीप्तोल्कोज्ज्वलपाणिषु ।
स्थितेषु द्वारमासाद्य रावणं मन्युराविशत् ॥ ३५ ॥

तस्य जृम्भितविक्षेपाद्व्यामिश्रा वै दिशो दश ।
रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत ॥ ३६ ॥

स निकुम्भं च कुम्भं च कुम्भकर्णात्मजावुभौ ।
प्रेषयामास सङ्क्रुद्धो राक्षसैर्बहुभिः सह ॥ ३७ ॥

शशास चैव तान्सर्वान्राक्षसान्राक्षसेश्वरः ।
राक्षसा गच्छतात्रैव सिंहनादं च नादयन् ॥ ३८ ॥

ततस्तु चोदितास्तेन राक्षसा ज्वलितायुधाः ।
लङ्काया निर्ययुर्वीराः प्रणदन्तः पुनः पुनः ॥ ३९ ॥

भीमाश्वरथमातङ्गं नानापत्ति समाकुलम् ।
दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम् ॥ ४० ॥

तद्राक्षसबलं घोरं भीमविक्रमपौरुषम् ।
ददृशे ज्वलितप्रासं किङ्किणीशतनादितम् ॥ ४१ ॥

हेमजालाचितभुजं व्यावेष्टितपरश्वधम् ।
व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकम् ॥ ४२ ॥

गन्धमाल्यमधूत्सेकसंमोदित महानिलम् ।
घोरं शूरजनाकीर्णं महाम्बुधरनिस्वनम् ॥ ४३ ॥

तं दृष्ट्वा बलमायान्तं राक्षसानां सुदारुणम् ।
सञ्चचाल प्लवङ्गानां बलमुच्चैर्ननाद च ॥ ४४ ॥

जवेनाप्लुत्य च पुनस्तद्राक्षसबलं महत् ।
अभ्ययात्प्रत्यरिबलं पतङ्ग इव पावकम् ॥ ४५ ॥

तेषां भुजपरामर्शव्यामृष्टपरिघाशनि ।
राक्षसानां बलं श्रेष्ठं भूयस्तरमशोभत ॥ ४६ ॥

तथैवाप्यपरे तेषां कपीनामसिभिः शितैः ।
प्रवीरानभितो जघ्नुर्घोररूपा निशाचराः ॥ ४७ ॥

घ्नन्तमन्यं जघानान्यः पातयन्तमपातयत् ।
गर्हमाणं जगर्हान्ये दशन्तमपरेऽदशत् ॥ ४८ ॥

देहीत्यन्ये ददात्यन्यो ददामीत्यपरः पुनः ।
किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभाषिरे ॥ ४९ ॥

समुद्यतमहाप्रासं मुष्टिशूलासिसङ्कुलम् ।
प्रावर्तत महारौद्रं युद्धं वानररक्षसाम् ॥ ५० ॥

वानरान्दश सप्तेति राक्षसा अभ्यपातयन् ।
राक्षसान्दशसप्तेति वानरा जघ्नुराहवे ॥ ५१ ॥

विस्रस्तकेशरसनं विमुक्तकवचध्वजम् ।
बलं राक्षसमालम्ब्य वानराः पर्यवारयन् ॥ ५२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.

Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com